# Shreemad Bhagawad Geeta: श्रीमद् - भगवद् - गीता

## अथ श्रद्धात्रयविभागयोगो नाम सप्तदशोऽध्यायः॥

अर्जुन उवाच ।

ये शास्त्रविधिम् उत्सृज्य यजन्ते श्रद्धया अन्विताः ।

तेषाम् निष्ठा तु का कृष्ण सत्त्वम् आहो रजः तमः ॥ १७ - १ ॥

| शब्द | शब्द उच्चार | English | हिन्दी | मराठी |
|---|---|---|---|---|
| अर्जुन | Arjuna | Arjuna | अर्जुन (ने) | अर्जुन |
| उवाच | Uvaacha | said | पूछा | विचारले |
| ये | Ye | They who | जो मनुष्य | जे (लोक) |
| शास्त्रविधिम् | Shaastra-vidhim | ordinance of scripture | शास्त्रविधिको | शास्त्रविधीला |
| उत्सृज्य | Utsrujya | setting aside / having cast away | त्यागकर | सोडून |
| यजन्ते | Yajante | worship | पूजन करते हैं | पूजा करतात |
| श्रद्धया | Shraddhayaa | with faith | श्रद्धासे | श्रद्धेने |
| अन्विताः | AnvitaaH | endowed | युक्त हुए | युक्त होऊन |
| तेषाम् | TeShaam | their | उनकी | त्यांची |
| निष्ठा | NiShThaa | state / condition | स्थिति | निष्ठा |
| तु | Tu | Indeed | फिर | मग |
| का | Kaa | What | कौन सी है? | कोणती |
| कृष्ण | Krishna | O Krishna! | हे कृष्ण ! | हे कृष्णा ! |
| सत्त्वम् | Sattvam | Sattva | सात्त्विकी | सात्त्विक |
| आहो | Aaho | or | अथवा | की |
| रजः | RajaH | Rajas | राजसी | राजस |
| तमः | TamaH | Tamas | (किंवा) तामसी ? | तामस |

अन्वय :- अर्जुन उवाच । हे कृष्ण ! ये शास्त्रविधिम् उत्सृज्य , श्रद्धया - अन्विताः ( सन्तः ) यजन्ते , तेषाम् तु का निष्ठा ? सत्त्वम् , रजः आहो तमः ? ॥ १७ - १ ॥

**English translation:-**

Arjuna asked, "O Krishna! What is the nature of the devotion of those, who though disregarding the ordinances of the Scriptures, worship (perform sacrifice) with abiding faith? Is it one of Sattva, Rajas or Tamas?"

हिन्दी अनुवाद :-

अर्जुन ने पूछा , " हे कृष्ण ! जो मनुष्य शास्त्रविधि को त्यागकर श्रद्धा से युक्त हुए देवादिका पूजन करते हैं , उनकी स्थिति फिर कौन सी है ? सात्त्विकी है अथवा राजसी किंवा तामसी ? "

मराठी भाषान्तर :-

अर्जुनाने विचारले , " हे कृष्णा ! जे लोक शास्त्रविधीला सोडून , पण श्रद्धापूर्वक देवादिकांची पूजा करतात ; त्यांची निष्ठा मग कोणती ? सात्त्विक , राजस की तामस ?

विनोबांची गीताई :-

ज़े शास्त्र - मार्ग सोडूनि श्रद्धा - पूर्वक पूजिती
त्यांची सात्त्विक ती निष्ठा किंवा राजस तामस ॥ १७ - १ ॥

श्री भगवान् उवाच।

त्रिविधा भवति श्रद्धा देहिनाम् सा स्वभावजा ।

सात्त्विकी राजसी च एव तामसी च इति ताम् श्रृणु ॥ १७ - २ ॥

| शब्द | शब्द उच्चार | English | हिन्दी | मराठी |
|---|---|---|---|---|
| श्री भगवान् | Shree Bhagavan | The Blessed Lord | श्री भगवान् ने | श्री भगवान |
| उवाच | Uvaacha | said | कहा | म्हणाले |
| त्रिविधा | Trividhaa | threefold | तीनों प्रकार की | तीन प्रकारची |
| भवति | Bhavati | is | होती है | असते |
| श्रद्धा | Shraddhaa | faith | श्रद्धा | श्रद्धा |
| देहिनाम् | Dehinaam | of embodied | मनुष्यों की | प्राणिमात्रांची |
| सा | Saa | which | वह | जी |
| स्वभावजा | Svabhaavajaa | born of own/ inherent nature | स्वभाव से उत्पन्न | स्वभावतः |
| सात्त्विकी | Saattvikee | Saattvika | सात्विकी | सात्विक |
| राजसी | Raajasee | Raajasee | राजसी | राजस |
| च | Cha | and | और | आणि |
| एव | Eva | even | तथा | च |
| तामसी | Taamasee | Taamasee | तामसी | तामस |
| च | Cha | and | और | आणि |
| इति | Iti | thus | ऐसे | अशा |
| ताम् | Taam | it | उस को | तिचे ( वर्णन 0 |
| श्रृणु | ShruNu | You hear | तुम मुझ से सुनो | तू ऐक |

अन्वय :- श्री भगवान् उवाच - देहिनाम् ( या ) स्वभावजा श्रद्धा सा सात्त्विकी च राजसी च तामसी च एव इति त्रिविधा भवति , ताम् शृणु ॥ १७ - २ ॥

**English translation:-**

The blessed Lord replied, “Threefold is the faith, born of individual nature of the embodied: Saattvika, Raajasika and Taamasika; listen to it thus.”

हिन्दी अनुवाद :-

श्री भगवान् ने कहा , “ मनुष्यों की वह शास्त्रीय संस्कारों से रहित , केवल स्वभाव से उत्पन्न श्रद्धा , सात्त्विकी और राजसी तथा तामसी ऐसे तीनों प्रकार की ही होती है । उसको तुम मुझ से सुनो ।“

मराठी भाषान्तर :-

श्रीभगवान म्हणाले , “ प्राणिमात्रांची ( पूर्व संचितानुसार ) स्वभावतः जी श्रद्धा असते ; ती सात्त्विक , राजस आणि तामस अशा तीन प्रकारचीच असते . त्याचे वर्णन तू आता ऐक . “

विनोबांची गीताई :-

तिन्ही प्रकारची श्रद्धा स्वभावें जीव मेळवी
ऐक सात्त्विक ती होय तशी राजस तामस ॥ १७ - २ ॥

सत्त्व अनुरूपा सर्वस्य श्रद्धा भवति भारत ।

श्रद्धामयः अयम् पुरुषः यः यत् श्रद्धः सः एव सः ॥ १७ - ३ ॥

| शब्द | शब्द उच्चार | English | हिन्दी | मराठी |
|---|---|---|---|---|
| सत्त्व | Sattva | One’s nature | उन के अन्तःकरण के | आपली स्वभावप्रकृती |
| अनुरूपा | Anuruupaa | in accordance with | अनुरूप | अनुसार |
| सर्वस्य | Sarvasya | of all | सभी मनुष्यों की | सर्व लोकांची |
| श्रद्धा | Shraddhaa | faith | श्रद्धा | श्रद्धा |
| भवति | bhavati | is | होती है | असते |
| भारत | Bhaarata | O Arjuna! | हे अर्जुन ! | हे अर्जुना ! |
| श्रद्धामयः | Bhaarata | consists of faith | श्रद्धामय है | श्रद्धावान |
| अयम् | Ayam | this | यह | हा ( मुळात ) |
| पुरुषः | PuruShaH | man | पुरुष | मनुष्य |
| यः | YaH | he who | जो पुरुष | ज्याची |
| यत् | Tat | that is | जैसी | जशी |
| श्रद्धः | ShraddhaH | his faith | श्रद्धावाला है | श्रद्धा |
| सः | SaH | he | वह | तो |
| एव | Eva | verily | स्वयम् भी | तसाच |
| सः | SaH | he is | वही है | तो असतो ( घडत जातो ) |

अन्वय :- हे भारत ! सर्वस्य सत्त्व - अनुरूपा श्रद्धा भवति , अयम् पुरुषः श्रद्धामयः ( अस्ति ) , यः यत् - श्रद्धः , सः एव सः ( जीव ) ॥ १७ - ३ ॥

**English translation:-**

O Arjuna! The faith of everyone is in accordance with one’s inherent nature. A man is made up of this abiding, enduring faith. He is verily what his faith is.

हिन्दी अनुवाद :-

हे अर्जुन ! सभी मनुष्यों की श्रद्धा उन के अन्तःकरण के अनुरूप होती है। यह पुरुष श्रद्धामय है। इसलिये जो पुरुष जैसी श्रद्धावाला है , वह स्वयम् भी वही है।

मराठी भाषान्तर :-

हे अर्जुना ! सर्व लोकांची श्रद्धा , आपापल्या सत्त्वाप्रमाणे म्हणजेच स्वभावप्रकृतिनुसार असते . मनुष्य हा ( मुळात ) श्रद्धावान आहे . जशी ज्याची श्रद्धा , तसाच तो असतो ( घडत जातो ) .

विनोबांची गीताई :-

ज़सा स्वभाव तो ज्याचा श्रद्धा त्याची तशी असे<br>
श्रद्धेचा घडिला जीव ज़शी श्रद्धा तसा चि तो ॥ १७ - ३ ॥

यजन्ते सात्त्विकाः देवान् यक्ष - रक्षांसि राजसाः ।

प्रेतान् भूतगणान् च अन्ये यजन्ते तामसाः जनाः ॥ १७ - ४ ॥

| शब्द | शब्द उच्चार | English | हिन्दी | मराठी |
|---|---|---|---|---|
| यजन्ते | Yajante | worship | पूजते हैं | पूजा करतात |
| सात्त्विकाः | SaattvikaaH | Saattvika | सात्त्विक पुरुष | सात्त्विक पुरुष |
| देवान् | Devaan | gods | देवोंको | देवांची |
| यक्षरक्षांसि | Yaksha-RakshaaMsi | demi-gods and demons | यक्ष और राक्षसोंको | यक्ष व राक्षसांची |
| राजसाः | RaajasaaH | Rajasika | राजस पुरुष | राजस पुरुष |
| प्रेतान् | Pretaan | ghosts | प्रेत | प्रेते |
| भूतगणान् | Bhuuta-GaNaan | host of spirits | भूतगणोंको | भूतगणांची |
| च | Cha | and | और | आणि |
| अन्ये | Anye | others | तथा अन्य जो | इतर |
| यजन्ते | Yajante | worship | वे पूजते हैं | पूजा करतात |
| तामसाः | TaamasaaH | Taamasika | तामस | तामस |
| जनाः | JanaaH | people | मनुष्य हैं | पुरुष |

अन्वय :- सात्त्विकाः देवान् यजन्ते । राजसाः यक्ष - रक्षांसि ( यजन्ते ) । अन्ये तामसाः जनाः प्रेतान् भूतगणान् च यजन्ते ॥ १७ - ४ ॥

**English translation:-**

The Satvikas worship the gods; Rajasikas worship the demi-gods and demons; the others i.e. Tamasikas worship the ghosts and host of spirits.

हिन्दी अनुवाद :-

सात्त्विक पुरुष देवों को पूजते हैं। राजस पुरुष यक्ष और राक्षसों को तथा अन्य जो तामस मनुष्य हैं; वे प्रेत और भूतगणों को पूजते हैं।

मराठी भाषान्तर :- सात्त्विक पुरुष देवांची पूजा करतात. राजस पुरुष यक्ष व राक्षसांची पूजा करतात आणि इतर तामस पुरुष प्रेत व भूतगणांची पूजा करतात.

विनोबांची गीताई :-

सत्त्व - स्थ पूजिती देव यक्ष - राक्षस राजस
प्रेतें आणि भुतें - खेतें पूजिती लोक तामस ॥ १७ - ४ ॥

अशास्त्र - विहितम् घोरम् तप्यन्ते ये तपः जनाः ।

दम्भ - अहङ्कार - सम् - युक्ताः काम - बल - राग - अन्विताः ॥ १७ - ५ ॥

| शब्द | शब्द उच्चार | English | हिन्दी | मराठी |
|---|---|---|---|---|
| अशास्त्र - विहितम् | Ashaastra - Vihitam | not enjoined by scripture | शास्त्रविधि से रहित केवल मनःकल्पित | शास्त्राविरुद्ध |
| घोरम् | Ghoram | terrible | घोर | भयंकर |
| तप्यन्ते | Tapyante | practise | तपते हैं | तप करतात |
| ये | Ye | they who | जो | जे |
| तपः | TapaH | austerity | तप को | तप |
| जनाः | JanaaH | people | मनुष्य | लोक |
| दम्भ | Dambha | hypocrisy | दम्भ और | दंभ |
| अहङ्कार | Ahamkaara | egoism | अहंकार से | अहंकार |
| सम् - युक्ताः | Sam-Yuktaa | with much | युक्त | युक्त होऊन |
| काम | Kaama | lust | कामना | कामवासना |
| राग | Raaga | attachment | आसक्ति | आसक्ती |
| बल - अन्विताः | Bala - AnvitaaH | by the force / power of | और बल के अभिमान से भी युक्त | बलाने प्रेरित होऊन |

अन्वय :- दम्भ - अहङ्कार - सम् - युक्ताः , काम - बल - राग - अन्विताः ये जनाः अशास्त्र - विहितम् घोरम् तपः तप्यन्ते ॥ १७ - ५ ॥

**English translation:-**

Those people who practise terrible austerities not enjoined by the scriptures, given to hypocrisy and egoism, impelled by the force of lust and attachment ....

हिन्दी अनुवाद :-

जो मनुष्य शास्त्रविधि से रहित केवल मनःकल्पित घोर तप को तपते हैं तथा दम्भ और अहंकार से युक्त एवं कामना , आसक्ति और बल के अभिमान से भी युक्त हैं ।

मराठी भाषान्तर :-

जे लोक दंभ आणि अहंकार यांनी युक्त होऊन कामवासनेच्या आणि उपभोगाच्या आसक्तीने प्रेरित होऊन , शास्त्राविरुद्ध महाघोर तप करतात .

विनोबांची गीताई :-

शास्त्रें निषेधिलें घोर दंभे आचरिती तप
अभिमानास पेटूनि काम - रागें बळावले ॥ १७ - ५ ॥

कर्षयन्तः शरीरस्थम् भूतग्रामम् अचेतसः ।

माम् च एव अन्तः शरीरस्थम् तान् विद्धि आसुर निश्चयान् ॥ १७ - ६ ॥

| शब्द | शब्द उच्चार | English | हिन्दी | मराठी |
|---|---|---|---|---|
| कर्षयन्तः | KarShayantaH | torturing | कृश करनेवाले हैं | कष्ट देणारे |
| शरीरस्थम् | Shareerastham | in body | शरीररूप से स्थित | शरीरातील |
| भूतग्रामम् | Bhuuta-Graamam | group of elements | भूतसमुदाय को | इंद्रिय समुदायाला |
| अचेतसः | AchetasaH | senseless ones / fools | अज्ञानियों को | अविवेकी लोक |
| माम् | Maam | Me | मुझ परमात्मा को | मला (ईश्वराला) |
| च | Cha | and | और | आणि |
| एव | Eva | even | भी | ही |
| अन्तः शरीरस्थम् | AntaH - Shareerastham | Within embodied | अन्तःकरण में स्थित | शरीरातील जो मी आत्मा म्हणून आहे त्याला |
| तान् | Taan | them | उन | त्यांना |
| विद्धि | Viddhi | know / recognise | तुम जानो | तू जाण |
| आसुर | Aasura | of demonic | आसुर / राक्षसी | आसुरी |
| निश्चयान् | Nishchayaan | resolve | स्वभाववाले | वृत्तीचे |

अन्वय :- अचेतसः च ( ये ) शरीरस्थम् भूतग्रामम् अन्तः शरीरस्थम् माम् च कर्षयन्तः , तान् एव आसुर - निश्चयान् विद्धि ॥ १७ - ६ ॥

**English translation:-**

Senseless fools that they are, they torture their bodily organs and even Me, embodied within, know them to be of demonic resolves.

हिन्दी अनुवाद :-

जो शरीररूप से स्थित भूतसमुदाय को और अन्तःकरण में स्थित मुझ परमात्मा को भी कृश करनेवाले हैं तथा कष्ट प्रदान करनेवाले हैं ; उन अज्ञानियों को तुम आसुर स्वभाववाले जानो ।

मराठी भाषान्तर :-

जे अविवेकी लोक , शरीरातील इंद्रिय समुदायाला आणि मज ईश्वराला म्हणजेच शरीरातील जो मी आत्मा म्हणून आहे , त्यालाही कष्ट देतात ; त्यांना तू आसुरी वृत्तीचे जाण .

विनोबांची गीताई :-

देह - धातूंस शोषूनि मज़ आत्म्यास पीडिती
विवेक - हीन ज़े त्यांची निष्ठा ती ज़ाण आसुरी ॥ १७ - ६ ॥

आहारः तु अपि सर्वस्य त्रिविधः भवति प्रियः ।

यज्ञः तपः तथा दानम् तेषाम् भेदम् इमम् श्रृणु ॥ १७ - ७ ॥

| शब्द | शब्द उच्चार | English | हिन्दी | मराठी |
|---|---|---|---|---|
| आहारः | AahaaraH | food | भोजन | आहार |
| तु | Tu | indeed / verily | और | आणि |
| अपि | Api | also | भी | ही |
| सर्वस्य | Sarvasya | of all | सब को अपनी अपनी प्रकृति के अनुसार | सर्वांच्या |
| त्रिविधः | TrividhaH | threefold | तीन प्रकार का | तीन प्रकारचा |
| भवति | Bhavati | is | होता है | असतो |
| प्रियः | PriyaH | dear | प्रिय | आवडीचा |
| यज्ञः | YadnyaH | sacrifice | यज्ञ | यज्ञ |
| तपः | TapaH | austerity | तप | तप |
| तथा | Tathaa | also | वैसे ही | तसेच |
| दानम् | Daanam | gift / alms giving | दान भी तीन तीन प्रकार के होते हैं | दान |
| तेषाम् | TeShaam | their | उनके | त्यांच्यातील |
| भेदम् | Bhedam | distinction | अलग अलग | वेगळेपणा |
| इमम् | Imam | this | इस | हा |
| श्रृणु | ShruNu | You hear | तुम मुझ से सुनो | तू ऐक |

अन्वय :- सर्वस्य प्रियः आहारः अपि तु त्रिविधः भवति , तथा यज्ञः , तपः , दानम् ( च सर्वस्य त्रिविधम् भवति त्वम् ) तेषाम् इमम् भेदम् श्रृणु ॥ १७ - ७ ॥

**English translation:-**

Verily, the food dear to all is also threefold, so as sacrifice, austerity and gift. Do hear this, their distinction.

हिन्दी अनुवाद :-

भोजन भी सब को अपनी - अपनी प्रकृति के अनुसार तीन प्रकार का प्रिय होता है । और वैसे ही यज्ञ तप और दान भी तीन - तीन प्रकार के होते हैं । उन के इस अलग - अलग भेद को तुम मुझ से सुनो ।

मराठी भाषान्तर :-

सर्वांच्या आवडीचा आहारही तीन प्रकारचा असतो . तसेच यज्ञ , तप आणि दानही तीन - तीन प्रकारचे असतात . त्यांच्यातील हा वेगळेपणा तू ऐक .

विनोबांची गीताई :-

आहारांत हि सर्वांच्या तीन भेद यथा - रुचि
तसें यज्ञीं तपीं दानीं सांगतों भेद ऐक ते ॥ १७ - ७ ॥

आयुः सत्त्व - बल - आरोग्य - सुख - प्रीति - विवर्धनाः ।

रस्याः स्निग्धाः स्थिराः हृद्याः आहाराः सात्त्विकप्रियाः ॥ १७ - ८ ॥

| शब्द | शब्द उच्चार | English | हिन्दी | मराठी |
|---|---|---|---|---|
| आयुः | AayuH | life / longevity | आयु | आयुष्य |
| सत्त्व | Sattva | purity | सत्व | मानसिक बळ |
| बल | Bala | strength | बल | शारीरिक बळ |
| आरोग्य | Aarogya | health | आरोग्य | आरोग्य |
| सुख | Sukha | joy | सुख | सुख |
| प्रीति | Preeti | cheerfulness and good appetite | प्रीति | प्रीती |
| विवर्धनाः | VivardhanaaH | those which increase | बढानेवाले | वाढविणारे |
| रस्याः | RasyaaH | savoury | रसयुक्त | रसयुक्त |
| स्निग्धाः | SnigdhaaH | oleaginous | चिकने | स्निग्ध |
| स्थिराः | SthiraaH | substantial | और स्थिर रहनेवाले | पौष्टिक |
| हृद्याः | HrudyaaH | agreeable | स्वभाव से हि मन को प्रिय ऐसे | मनाला आनंद देणारे |
| आहाराः | AahaaraaH | the foods | आहार अर्थात् भोजन करने के पदार्थ | आहार |
| सात्त्विक-प्रियाः | Saattvika-PriyaaH | Are dear to the Saattvika | सात्त्विक पुरुष को प्रिय होते हैं | सात्त्विक पुरुषाला प्रिय असतात |

अन्वय :- आयुः - सत्त्व - बल - आरोग्य - सुख - प्रीति – विवर्धनाः , रस्याः , स्निग्धाः , स्थिराः , हृद्याः , आहाराः सात्त्विकप्रियाः ( सन्ति ) ॥ १७ - ८ ॥

**English translation:-**

The food that increases vitality, energy, purity, vigour, health, joy and cheerfulness, which are savoury and oleaginous, substantial and agreeable are dear to the Saattvika.

हिन्दी अनुवाद :-

आयु , बुद्धि , बल , आरोग्य , सुख और प्रीति को बढानेवाले , रसयुक्त , चिकने और स्थिर रहनेवाले तथा स्वभाव से हि मन को प्रिय - ऐसे आहार अर्थात् भोजन करने के पदार्थ सात्विक पुरुष को प्रिय होते हैं ।

मराठी भाषान्तर :-

आयुष्य , मानसिक बळ , शारीरिक बळ , आरोग्य , सुख व प्रीती वाढविणारे ; रसयुक्त , स्निग्ध , पौष्टिक ( शरीरात परिणाम रूपाने चिरकाल राहणारे ) , मनाला आनंद देणारे आहार , सात्त्विक पुरुषाला प्रिय असतात .

विनोबांची गीताई :-

सत्त्व प्रीति सुख स्वास्थ्य आयुष्य बळ वाढवी<br>
रसाळ मधुर स्निग्ध स्थिर आहार सात्त्विक ॥ १७ - ८ ॥

कटुः अम्लः लवणः अत्युष्णः तीक्ष्णः रूक्षः विदाहिनः ।

आहाराः राजसस्य इष्टाः दुःख - शोकः - आमयः - प्रदाः ॥ १७ - ९ ॥

| शब्द | शब्द उच्चार | English | हिन्दी | मराठी |
|---|---|---|---|---|
| कटुः | KatuH | bitter | कडवे | कडवट |
| अम्लः | AmlaH | sour | खट्टे | आंबट |
| लवणः | LavaNaH | salty | नमकीन | खारट |
| अत्युष्णः | AtyuShNaH | very hot | बहुत गरम | अति - उष्ण |
| तीक्ष्णः | TiikshNaH | pungent | तीखे | झणझणीत / तिखट |
| रूक्षः | RuukshaH | dry | रूखे | कोरडे |
| विदाहिनः | VidaahinaH | burning | दाहकारक | जळजळीत |
| आहाराः | AahaaraaH | foods | आहार अर्थात् भोजन करने के पदार्थ | आहार |
| राजसस्य | Raajasasya | of the Raajasika | राजस पुरुष को | राजस पुरुषाला |
| इष्टाः | IShTaaH | are relished | प्रिय होते हैं | प्रिय असतात |
| दुःख | DukhaH | pain | दुःख | दुःख |
| शोकः | ShokaH | grief | चिन्ता | काळजी |
| आमयः | AamayaH | disease | तथा रोगों को | रोग |
| प्रदाः | PradaaH | producing | उत्पन्न करनेवाले | वाढविणारे |

अन्वय :- कटुः - अम्लः - लवणः - अत्युष्णः - तीक्ष्णः - रूक्षः - विदाहिनः , दुःख - शोकः - आमयः - प्रदाः आहाराः राजसस्य इष्टाः ( भवन्ति ) ॥ १७ - ९ ॥

**English translation:-**

Foods bitter, sour, salty, very hot, pungent, dry and burning, which produce pain, grief and disease, are relished by the Raajasika.

हिन्दी अनुवाद :-

कडवे , खट्टे , नमकीन , बहुत गरम , तीखे , रूखे , दाहकारक और दुःख चिन्ता तथा रोगों को उत्पन्न करनेवाले आहार अर्थात् भोजन ; राजस पुरुष को प्रिय होते हैं ।

मराठी भाषान्तर :-

कडवट , आंबट , खारट , अति - उष्ण , झणझणीत तिखट , कोरडे , जळजळीत ; तसेच दुःख , काळजी आणि रोग वाढविणारे आहार , राजस पुरुषाला प्रिय असतात .

विनोबांची गीताई :-

खारे रुक्ष कडू तीख अम्ल अत्युष्ण दाहक
दुःख - शोक - द आहार रोग वर्धक राजस ॥ १७ - ९ ॥

यातयामम् गतरसम् पूति पर्युषितम् च यत् ।

उच्छिष्टम् अपि च अमेध्यम् भोजनम् तामसप्रियम् ॥ १७ - १० ॥

| शब्द | शब्द उच्चार | English | हिन्दी | मराठी |
|---|---|---|---|---|
| यातयामम् | Yaatayaamam | stale | अध-पका | बऱ्याच वेळापूर्वी शिजविल्याने थंड झालेले / प्रहर उलटलेले |
| गतरसम् | Gatarasam | tasteless | रसरहित | नीरस |
| पूति | Pooti | putrid | दुर्गन्धयुक्त | विटलेले |
| पर्युषितम् | ParyuShitam | rotten | बासी | शिळे ( अनेक दिवसांचे ) |
| च | Cha | and | और | आणि |
| यत् | Yat | which | जो | जे |
| उच्छिष्टम् | UchchhiShTam | left over / polluted | उच्छिष्ट है | उष्टे |
| अपि | Api | also | भी है | सुद्धा |
| च | Cha | and | तथा जो | आणि |
| अमेध्यम् | Amedhyam | impure | अपवित्र | अमंगळ |
| भोजनम् | Bhojanam | food | भोजन | अन्न |
| तामसप्रियम् | Taamasa-Priyam | dear to the Taamasika | भोजन तामस पुरुष को प्रिय होता है | तामस पुरुषाला प्रिय असते |

अन्वय :- यत् यातयामम् , गतरसम् , पूति , पर्युषितम् च उच्छिष्टम् अपि च अमेध्यम् भोजनम् ( तत् ) तामसप्रियम् ( अस्ति ) ॥ १७ - १० ॥

**English translation:-**

Food which is stale, tasteless, putrid, rotten left over, polluted and impure is dear to the Taamasika.

हिन्दी अनुवाद :-

जो भोजन अध-पका , रसरहित , दुर्गन्धयुक्त , बासी और उच्छिष्ट है तथा जो अपवित्र भी है , वह भोजन तामस पुरुष को प्रिय होता है ।

मराठी भाषान्तर :-

बऱ्याच वेळापूर्वी शिजविल्याने थंड झालेले , नीरस , विटलेले , शिळे ( अनेक दिवसांचे ) , उष्टे आणि अमंगळ अन्न तामस पुरुषाला प्रिय असते .

विनोबांची गीताई :-

रस - हीन निवालेलें शिळें दुर्गंध - युक्त जें
निषिद्ध आणि उष्टें हि तामस - प्रिय भोजन ॥ १७ - १० ॥

अफल आकाङ्क्षिभिः यज्ञः विधिदृष्टः यः इज्यते ।

यष्टव्यम् एव इति मनः समाधाय सः सात्त्विकः ॥ १७ - ११ ॥

| शब्द | शब्द उच्चार | English | हिन्दी | मराठी |
|---|---|---|---|---|
| अफल - आकाङ्क्षिभिः | Aphala - AakaankshibhiH | by those desiring no fruit | फल न चाहनेवाले पुरुषोंद्वारा | फळाची अपेक्षा सोडलेल्या पुरुषांकडून |
| यज्ञः | YadnyaH | sacrifice | यज्ञ | यज्ञ |
| विधिदृष्टः | VidhidruShTaH | as enjoined by ordinance | शास्त्रविधि से नियत | यथाशास्त्र |
| यः | YaH | which | जो | जो (यज्ञ) |
| इज्यते | Ijyate | is offered | किया जाता है | केला जातो |
| यष्टव्यम् | YShTavyam | ought to be offered | करना कर्तव्य है | कर्तव्यबुद्धीने |
| एव | Eva | only | ही | ह्याच |
| इति | Iti | thus | इस प्रकार | अशाप्रकारे |
| मनः | ManaH | the mind | मन को | मन |
| समाधाय | Samaadhaaya | having fixed / focussed | समाधान कर के | शांत ठेवून |
| सः | SaH | that | वह | त्याला |
| सात्त्विकः | SaattvikaH | Saattvika | सात्त्विक है | सात्त्विक (यज्ञ म्हणतात) |

अन्वय :- अफल - आकाङ्क्षिभिः ( पुरुषैः ) यष्टव्यम् एव इति मनः समाधाय विधिदृष्टः यः यज्ञः इज्यते , सः सात्त्विकः ( यज्ञः मतः ) ॥ १७ - ११ ॥

**English translation:-**

The sacrifice offered by those desiring no fruit, as enjoined by ordinance, with the mind well resolved that they should merely sacrifice without expecting anything in return, that is called as Saattvika Yadnya.

हिन्दी अनुवाद :-

जो शास्त्रविधि से नियत यज्ञ करना ही कर्तव्य है - इस प्रकार मन को समाधान कर के , फल न चाहनेवाले पुरुषों द्वारा किया जाता है , वह सात्त्विक यज्ञ है ।

मराठी भाषान्तर :-

फळाची अपेक्षा न करता , कर्तव्यबुद्धीने , मन शांत ठेवून , यथाशास्त्र केलेल्या यज्ञाला सात्त्विक यज्ञ म्हणतात .

विनोबांची गीताई :-

फलाभिलाष सोडूनि कर्तव्य चि म्हणूनियां
विधीनें मन लावूनि होय तो यज्ञ सात्विक ॥ १७ - ११ ॥

अभिसंधाय तु फलम् दम्भार्थम् अपि च एव यत् ।

इज्यते भरतश्रेष्ठ तम् यज्ञम् विद्धि राजसम् ॥ १७ - १२॥

| शब्द | शब्द उच्चार | English | हिन्दी | मराठी |
|---|---|---|---|---|
| अभिसंधाय | Abhi-SaMdhaaya | seeking for | दृष्टि में रखकर | मनात अपेक्षा ठेवून |
| तु | Tu | indeed | परन्तु | परन्तु |
| फलम् | Phalam | fruit | फल को | फळाची |
| दम्भार्थम् | Dambha-Artham | for the sake of ostentation | दम्भाचरण के लिये | दांभिकपणाने |
| अपि | Api | also | भी | ही |
| च | Cha | and | अथवा | आणि |
| एव | Eva | even | केवल | केवळ |
| यत् | Tat | that which | जो यज्ञ | जो यज्ञ |
| इज्यते | Ijyate | is offered | किया जाता है | केला जातो |
| भरतश्रेष्ठ | Bharata-ShreShTha | O Best of Bharatas | हे अर्जुन ! | हे अर्जुना ! |
| तम् | Tam | that | उस | तो |
| यज्ञम् | Yadnyam | sacrifice | यज्ञ को | यज्ञ |
| विद्धि | Viddhi | know | तुम जानो | तू समज |
| राजसम् | Raajasam | Rajasika | राजस | राजस |

अन्वय :- हे भरतश्रेष्ठ ! फलम् तु अभिसंधाय , अपि च दम्भार्थम् एव यत् इज्यते , तम् यज्ञम् राजसम् विद्धि ॥ १७ - १२॥

**English translation:-**

O best of Bharatas, the sacrifice offered in expectation of reward (fruit) and for self - glorification, know that as Raajasika Yadnya.

हिन्दी अनुवाद :-

परन्तु हे अर्जुन ! केवल दम्भाचरण के लिये अथवा फल को भी दृष्टि में रखकर जो यज्ञ किया जाता है उस यज्ञ को तुम राजस जानो ।

मराठी भाषान्तर :-

हे अर्जुना ! मनात फळाचीही अपेक्षा ठेवून आणि केवळ दांभिकपणाने जो यज्ञ केला जातो ; तो राजस यज्ञ आहे असे तू समज .

विनोबांची गीताई :-

फळाचें अनुसंधान राखुनी दंभ - पूर्वक

लोकांत यजिला ज़ाय ज़ाण तो यज्ञ राजस ॥ १७ - १२ ॥

विधिहीनम् असृष्ट - अन्नम् मन्त्रहीनम् अदक्षिणम् ।

श्रद्धाविरहितम् यज्ञम् तामसम् परिचक्षते ॥ १७ - १३॥

| शब्द | शब्द उच्चार | English | हिन्दी | मराठी |
|---|---|---|---|---|
| विधिहीनम् | Vidhee - Heenam | contrary to ordinance | शास्त्रविधि से हीन | शास्त्रविधीला सोडून |
| असृष्ट - अन्नम् | AsruShTa - Annam | in which food is not distributed | अन्नदान से रहित | अन्नदान न करता |
| मन्त्रहीनम् | Mantra - Heenam | which is devoid of holy chanting | मन्त्रों के बिना | मंत्राशिवाय |
| अदक्षिणम् | A-Daksheenam | without gift | दक्षिणा के बिना | दक्षिणा न देता |
| श्रद्धाविरहितम् | Shraddhaa - Virahitam | which is devoid of faith | श्रद्धा के बिना | श्रद्धेवाचून |
| यज्ञम् | Yadnyam | sacrifice | किये जानेवाले यज्ञ को | केलेला यज्ञ |
| तामसम् | Taamasam | Taamasika | तामस यज्ञ | हा तामस यज्ञ |
| परिचक्षते | Parichakshyate | they declare | कहते हैं | म्हणतात |

अन्वय :- विधिहीनम् , असृष्ट - अन्नम् , मन्त्रहीनम् , अदक्षिणम् , श्रद्धाविरहितम् ( च ) यज्ञम् तामसम् परिचक्षते ॥ १७ - १३॥

**English translation:-**

The sacrifice which is severed from ordinance, in which no food is distributed, which is devoid of Mantras, gift and all abiding faith is declared as Taamasika Yadnya.

हिन्दी अनुवाद :-

शास्त्रविधि से हीन , अन्नदान से रहित ; मन्त्रों के , दक्षिणा के और श्रद्धा के बिना किये जानेवाले यज्ञ को तामस यज्ञ कहते हैं ।

मराठी भाषान्तर :-

शास्त्रविधीला सोडून , अन्नदान न करता , मंत्राशिवाय , दक्षिणा न देता , श्रद्धेवाचून केलेला यज्ञ हा तामस यज्ञ होय .

विनोबांची गीताई :-

नसे विधि नसे मंत्र अन्नोत्पत्ति नसे जिथें<br>
नसे श्रद्धा नसे त्याग बोलिला यज्ञ तामस ॥ १७ - १३ ॥

देव - द्विज - गुरु - प्राज्ञः पूजनम् शौचम् आर्जवम् ।

ब्रह्मचर्यम् अहिंसा च शारीरम् तपः उच्यते ॥ १७ - १४॥

| शब्द | शब्द उच्चार | English | हिन्दी | मराठी |
|---|---|---|---|---|
| देव | Deva | gods | देवता | देव |
| द्विज | Dvija | twice born ones / BrahmaNas | ब्राह्मण | ब्राम्हण |
| गुरु | Guru | teachers | गुरु और | गुरुजन |
| प्राज्ञः | PradnyaH | wise ones | ज्ञानीजनों का | ज्ञानी |
| पूजनम् | Poojanam | worship | पूजन | पूजा |
| शौचम् | Shaucham | purity | पवित्रता | शुद्धता |
| आर्जवम् | Aavarjam | uprightness / straight-forwardness | सरलता | शरीर आणि मनाचा समतोल व समन्वय |
| ब्रह्मचर्यम् | Brahma-charyam | celibacy | ब्रह्मचर्य और | ब्रह्मचर्य |
| अहिंसा | Ahimsaa | non-injury | अहिंसा | अहिंसा |
| च | Cha | and | और | आणि |
| शारीरम् | Shaariram | of the body | यह शरीर सम्बन्धी | शारीरिक म्हणजेच कायिक |
| तपः | TapaH | austerity | तप | तप |
| उच्यते | Uchyate | is called | कहा जाता है | असे म्हणतात |

अन्वय :- देव - द्विज - गुरु - प्राज्ञः - पूजनम् , शौचम् , आर्जवम् , ब्रह्मचर्यम् , अहिंसा च ( इति ) शारीरम् तपः उच्यते ॥ १७ - १४॥

**English translation:-**

The worship of gods, twice born, gurus and the wise and purity, uprightness, celibacy and non-injury these are called austerity of body (Shaareerika Tapa).

हिन्दी अनुवाद :-

देवता , ब्राह्मण , गुरु और ज्ञानीजनों का पूजन , पवित्रता , सरलता , ब्रह्मचर्य और अहिंसा ; यह शरीर - सम्बन्धी तप कहा जाता है ।

मराठी भाषान्तर :-

देव - ब्राम्हण - गुरुजन आणि ज्ञानी यांची पूजा , स्नानादि शुद्धता , शरीर आणि मनाचा समतोल व समन्वय , ब्रह्मचर्य आणि अहिंसा याला शारीरिक म्हणजेच कायिक तप असे म्हणतात .

विनोबांची गीताई :-

गुरु - देवादिकीं पूजा स्वच्छता वीर्य - संग्रह
अहिंसा ऋजुता अंगीं देहाचें तप बोलिलें ॥ १७ - १४ ॥

अनुद्वेगकरम् वाक्यम् सत्यम् प्रियहितम् च यत् ।

स्वाध्याय अभ्यसनम् च एव वाङ्मयम् तपः उच्यते ॥ १७ - १५॥

| शब्द | शब्द उच्चार | English | हिन्दी | मराठी |
|---|---|---|---|---|
| अनुद्वेगकरम् | An-Udvegakaram | causing no excitement | उद्वेग न करनेवाला | कोणाच्याही मनाला न दुखविणारे |
| वाक्यम् | Vaakyam | speech | भाषण है | भाषण |
| सत्यम् | Satyam | truthful | यथार्थ | सत्य |
| प्रियहितम् | Priyahitam | pleasant and beneficial | प्रिय और हितकारक | प्रिय व हितकारक |
| च | Cha | and | एवं | आणि |
| यत् | Yat | that which | जो | असे |
| स्वाध्याय - अभ्यसनम् | Svaadhyaaya – Abhyasanam | Practice of the study of the Vedas | वेद शास्त्रों के पठन का एवं परमेश्वर के नाम –जप का अभ्यास है | वेदांचे अध्ययन करणे |
| च | Cha | and | तथा | आणि |
| एव | Eva | also | वही | याला |
| वाङ्मयम् | Vaangmayam | of speech | वाणी - सम्बन्धी | वाणीचे किंवा वाचिक |
| तपः | TapaH | austerity | तप | तप |
| उच्यते | Uchyate | called | कहा जाता है | असे म्हणतात |

अन्वय :- यत् अनुद्वेगकरम् , सत्यम् , प्रियहितम् वाक्यम् च ( यत् ) स्वाध्याय - अभ्यसनम् च, ( तत् ) एव वाङ्मयम् तपः ( इति ) उच्यते ॥ १७ - १५॥

**English translation:-**

The speech which causes no undue excitement and is truthful, pleasant and beneficial, and also the study of Vedas – these are called as austerity of speech (Vaangmaya Tapa).

हिन्दी अनुवाद :-

जो उद्वेग न करनेवाला , प्रिय और हितकारक एवं यथार्थ भाषण है तथा जो वेद – शास्त्रों के पठन का एवं परमेश्वर के नाम - जपका अभ्यास है ---- वही वाणी - सम्बन्धी तप कहा जाता है ।

मराठी भाषान्तर :-

कोणाच्याही मनाला न दुखविणारे , सत्य , प्रिय व हितकारक असे भाषण आणि वेदांचे अध्ययन करणे ; याला वाणीचे किंवा वाचिक तप असे म्हणतात .

विनोबांची गीताई :-

हितार्थ बोलणें सत्य प्रेमानें न खुपलसें
स्वाध्याय करणें नित्य वाणीचें तप बोलिलें ॥ १७ - १५ ॥

मनःप्रसादः सौम्यत्वम् मौनम् आत्मविनिग्रहः ।

भावसंशुद्धिः इति एतत् तपः मानसम् उच्यते ॥ १७ - १६॥

| शब्द | शब्द उच्चार | English | हिन्दी | मराठी |
|---|---|---|---|---|
| मनःप्रसादः | ManaH-PrasaadaH | serenity of mind | मन की प्रसन्नता | मनाची प्रसन्नता |
| सौम्यत्वम् | Saumyatvam | gentleness | शान्तभाव | मन शांत ठेवणे |
| मौनम् | Maunam | silence | भगवत् चिन्तन करने का स्वभाव | मौन धारण करणे |
| आत्मविनिग्रहः | Aatma-VinigrahaH | self-restraint | मन का निग्रह | मनाचा निग्रह |
| भावसंशुद्धिः | Bhaava-SamshuddhiH | very pure disposition | अन्तःकरण के भावों की भलीभाँति पवित्रता | अन्तःकरणाचे पावित्र्य राखणे |
| इति | Iti | thus | इस प्रकार | अशाप्रकारच्या |
| एतत् | Etat | this | यह | या |
| तपः | TapaH | austerity | तप | तप |
| मानसम् | Maanasam | mental | मनसम्बन्धी | मानसिक |
| उच्यते | Uchyate | called | कहा जाता है | असे म्हणतात |

अन्वय :- मनःप्रसादः , सौम्यत्वम् , मौनम् , आत्मविनिग्रहः , भावसंशुद्धिः इति एतत् मानसम् तपः उच्यते ॥ १७ - १६॥

**English translation:-**

Serenity of mind, gentleness, silence, self-restraint and very pure disposition these qualities are called austerity of mind (Maanasika Tapa).

हिन्दी अनुवाद :-

मन की प्रसन्नता , शान्तभाव , भगवत् चिन्तन करने का स्वभाव , मन का निग्रह और अन्तःकरण के भावों की भलीभाँति पवित्रता -- इस प्रकार यह मनसम्बन्धी तप कहा जाता है।

मराठी भाषान्तर :-

मनाची प्रसन्नता , मन शांत ठेवणे , मौन धारण करणे , मनाचा निग्रह आणि अन्तःकरणाचे पावित्र्य राखणे ; या सर्वांना मानसिक तप असे म्हणतात .

विनोबांची गीताई :-

प्रसन्न - वृत्ति सौम्यत्व आत्म - चिंतन संयम
भावना राखणें शुद्ध मनाचें तप बोलिलें ॥ १७ - १६ ॥

श्रद्धया परया तप्तम् तपः तत् त्रिविधम् नरैः ।

अफल आकाङ्क्षिभिः युक्तैः सात्त्विकम् परिचक्षते ॥ १७ - १७॥

| शब्द | शब्द उच्चार | English | हिन्दी | मराठी |
|---|---|---|---|---|
| श्रद्धया | Shraddhayaa | with faith | श्रद्धा से | श्रद्धेने |
| परया | Parayaa | highest | परम | अत्यंत |
| तप्तम् | Taptam | practised | किये हुए | आचरलेल्या |
| तपः | TapaH | austerity | तप को | तप |
| तत् | Tat | that | उस पूर्वोक्त | ते |
| त्रिविधम् | Trividham | threefold | तीन प्रकार के | तिन्ही प्रकारच्या |
| नरैः | NaraiH | by men | पुरुषों द्वारा | पुरुषांकडून |
| अफल | Aphala | no fruit | फल को न | फळ नाही |
| आकाङ्क्षिभिः | AakaankshibhiH | desiring | चाहनेवाले | अपेक्षा करणाऱ्या |
| युक्तैः | YuktaiH | steadfast | योगी | योगी |
| सात्त्विकम् | Saattvikam | Saattvikaa | सात्त्विक | सात्त्विक |
| परिचक्षते | Parichakshate | they declare | कहते हैं | असे म्हणतात |

अन्वय :- अफल - आकाङ्क्षिभिः युक्तैः नरैः परया श्रद्धया तप्तम् ( यत् ) त्रिविधम् तपः , तत् सात्त्विकम् परिचक्षते ॥ १७ - १७ ॥

**English translation:-**

The threefold austerity, practised by devout men with utmost faith and desiring no reward is declared as Saattvika.

हिन्दी अनुवाद :-

फल को न चाहनेवाले योगी पुरुषों द्वारा , परम श्रद्धा से किये हुए , उस पूर्वोक्त तीन प्रकार के तप को , सात्त्विक कहते हैं ।

मराठी भाषान्तर :-

फळाची अपेक्षा न करणाऱ्या , योगी पुरुषांकडून अत्यंत श्रद्धेने केलेल्या , पूर्वोक्त तिन्ही प्रकारच्या म्हणजेच कायिक , वाचिक आणि मानसिक तपाला ; सात्त्विक तप असे म्हणतात .

विनोबांची गीताई :-

तिहेरी तप तें सारें श्रद्धा उत्कट ज़ोडुनी
समत्वें फळ सोडूनि घडलें ज़ाण सात्त्विक ॥ १७ - १७ ॥

सत्कार मान पूजा अर्थम् तपः दम्भेन च एव यत् ।

क्रियते तत् इह प्रोक्तम् राजसम् चलम् अध्रुवम् ॥ १७ - १८॥

| शब्द | शब्द उच्चार | English | हिन्दी | मराठी |
|---|---|---|---|---|
| सत्कार | Satkaara | reverence | सत्कार | सत्कार |
| मान | Maana | honour | मान | मान |
| पूजा - अर्थम् | Poojaa - Artham | with the object of gaining worship | और पूजा के लिये | पूजेसाठी |
| तपः | TapaH | austerity | तप | तप |
| दम्भेन | Dambhena | with ostentation | पाखण्ड से | दांभिकपणे |
| च | Cha | and | तथा | आणि |
| एव | Eva | also | केवल (अन्य किसी स्वार्थ के लिये भी स्वभाव से) | सुद्धा |
| यत् | Yat | that which | जो | जे |
| क्रियते | Kriyate | is done | किया जाता है | केले जाते |
| तत् | Tat | that | वह | ते |
| इह | Iha | here | यहाँ | येथे |
| प्रोक्तम् | Proktam | is said | कहा गया है | असे म्हणतात |
| राजसम् | Raajasam | Rajasika | राजस | राजस |
| चलम् | Chalam | unstable | क्षणिक फलवाला तप | चंचल |
| अध्रुवम् | Adhruvam | transitory | अनिश्चित | अस्थिर |

अन्वय :- सत्कार - मान - पूजा - अर्थम् दम्भेन च एव यत् तपः क्रियते , तत् इह राजसम् चलम् अध्रुवम् प्रोक्तम् ॥ १७ - १८॥

**English translation:-**

The austerity which is practised with the object of gaining reverence, honour and worship and with ostentation is said here in this world, to be “Raajasika Tapa”, that is unstable and transitory.

हिन्दी अनुवाद :-

जो तप सत्कार , मान और पूजा के लिये तथा अन्य किसी स्वार्थ के लिये भी स्वभाव से या पाखण्ड से किया जाता है , वह अनिश्चित एवं क्षणिक फलवाला तप यहाँ राजस कहा गया है।

मराठी भाषान्तर :-

जे तप आपल्या सत्कार , मान व पूजेसाठी दांभिकपणे केले जाते , त्या अस्थिर आणि चंचल तपाला , राजस तप असे म्हणतात .

विनोबांची गीताई :-

सत्कारादिक इच्छूनि केलें जें दंभ राखुनी
तें चंचळ इथें ज़ाण तप राजस अस्थिर ॥ १७ - १८ ॥

मूढग्राहेण आत्मनः यत् पीडया क्रियते तपः ।

परस्य उत्सादन अर्थम् वा तत् तामसम् उदाहृतम् ॥ १७ - १९॥

| शब्द | शब्द - उच्चार | English | हिन्दी | मराठी |
|---|---|---|---|---|
| मूढग्राहेण | MuuDha-Graahena | out of a foolish notion | मूढतापूर्वक हठ से | मूर्खपणाने , अट्टाहासाने |
| आत्मनः | AatmanaH | of self | अपने (मन वाणी और शरीर की) | स्वतःला ( मन वाणी आणि शरीराला ) |
| यत् | Yat | that which | जो | जे |
| पीडया | Peedayaa | with torture | पीडा के सहित | त्रास देऊन |
| क्रियते | Kriyate | is done | किया जाता है | केले जाते |
| तपः | TapaH | austerity | तप | तप |
| परस्य | Parasya | of another | दूसरे का | दुसऱ्यांचे |
| उत्सादन | Utsaadana | destruction | अनिष्ट | अहित |
| अर्थम् | Artham | for the purpose of | करने के लिये | करण्यासाठी |
| वा | Vaa | or | अथवा | अथवा |
| तत् | Tat | that | वह तप | त्याला |
| तामसम् | Taamasam | Taamasika | तामस | तामस तप |
| उदाहृतम् | Udaahrutam | is declared | कहा गया है | असे म्हणतात |

अन्वय :- मूढग्राहेण आत्मनः पीडया परस्य उत्सादन - अर्थम् वा यत् तपः क्रियते , तत् तामसम् उदाहृतम् ॥ १७ - १९ ॥

**English translation:-**

The austerity practised with foolish notion, torturing oneself or aiming to destroy another is declared as "Taamasika Tapa".

हिन्दी अनुवाद :-

जो तप मूढतापूर्वक हठ से , मन , वाणी और शरीर की पीडा के सहित अथवा दूसरे का अनिष्ट करने के लिये किया जाता है -- वह तप तामस कहा गया है ।

मराठी भाषान्तर :-

जे तप मूर्खपणाने , अट्टाहासाने , स्वतःला म्हणजेच मन , वाणी आणि शरीराला त्रास देऊन , दुसऱ्यांचे अहित करण्यासाठी केले जाते ; त्याला तामस तप असे म्हणतात .

विनोबांची गीताई :-

दुराग्रहें चि जें होय अंतरात्म्यास पीडुनी<br>
किंवा जें पर - घातार्थ ज्ञाण तामस तें तप ॥ १७ - १९ ॥

दातव्यम् इति यत् दानम् दीयते अनुपकारिणे ।

देशे काले च पात्रे च तत् दानम् सात्त्विकम् स्मृतम् ॥ १७ - २०॥

| शब्द | शब्द - उच्चार | English | हिन्दी | मराठी |
|---|---|---|---|---|
| दातव्यम् | Daatavyam | ought to be given | दान देना ही कर्तव्य है | कर्तव्य भावनेने दान करणे |
| इति | Iti | thus | ऐसे भाव से | असे |
| यत् | Yat | that which | जो | जे |
| दानम् | Daanam | gift | दान | दान |
| दीयते | Deeyate | is given | दिया जाता है | दिले जाते |
| अनुपकारिणे | An-UpakaariNe | to one who does no service in return | उपकार न करनेवाले के प्रति | (आपल्या दानाच्या) परतफेडीची अपेक्षा न बाळगता |
| देशे | Deshe | in place | देश | योग्य स्थळी |
| काले | Kaale | in time | तथा काल | योग्य काळी |
| च | Cha | and | और | आणि |
| पात्रे | Paatre | to recipient | पात्र के प्राप्त होनेपर | योग्य पुरुषाला |
| च | Cha | and | और | आणि |
| तत् | Tat | that | वह | त्या |
| दानम् | Daanam | gift | दान | दानाला |
| सात्त्विकम् | Saattvikam | Saattvika | सात्त्विक | सात्त्विक |
| स्मृतम् | Smrutam | is considered | कहा गया है | असे म्हणतात |

अन्वय :- दातव्यम् इति यत् दानम् देशे च काले च पात्रे ( च ) अनुपकारिणे दीयते , तत् दानम् सात्त्विकम् स्मृतम् ॥ १७ - २० ॥

**English translation:-**

The gift which is given to one who does no service in return, with the feeling that it is one's duty to give and which is given at the right place, in right time and to a worthy person is considered as "Saattvika Daana".

हिन्दी अनुवाद :-

दान देना यह योग्य कर्तव्य है -- इस भाव से जो दान , देश तथा काल और पात्र के प्राप्त होनेपर , उपकार न करनेवाले के प्रति दिया जाता है ; वह दान सात्त्विक कहा गया है ।

मराठी भाषान्तर :-

दान करणे हेच योग्य कर्तव्य आहे असे मानून , आपल्या दानाच्या परतफेडीची अपेक्षा न बाळगता , योग्य पुरुषाला , योग्य स्थळी आणि योग्य काळी दिले जाते ; त्याला सात्त्विक दान असे म्हणतात .

विनोबांची गीताई :-

देशीं काळीं तसें पात्रीं उपकार न इच्छितां
धर्म - भावें चि जें देणें ज्ञाण तें दान सात्त्विक ॥ १७ - २० ॥

यत् तु प्रति - उपकार - अर्थम् फलम् उद्दिश्य वा पुनः ।
दीयते च परिक्लिष्टम् तत् दानम् राजसम् स्मृतम् ॥ १७ - २१॥

| शब्द | शब्द उच्चार | English | हिन्दी | मराठी |
|---|---|---|---|---|
| यत् | Yat | that which | जो दान | जे ( दान ) |
| तु | Tu | indeed | किन्तु | परंतु |
| प्रति - उपकार - अर्थम् | Prati-Upakaara-Artham | with a view to receive in return | प्रत्युपकार के प्रयोजन से | परतफेडीच्या अपेक्षेने |
| फलम् | Phalam | fruit | फल को | फळाची |
| उद्दिश्य | Uddishya | having expected | दृष्टि में रखकर | इच्छा ठेवून |
| वा | Vaa | or | अथवा | अथवा |
| पुनः | PunaH | again | फिर | परत |
| दीयते | Deeyate | is given | दिया जाता है | दिले जाते |
| च | Cha | and | तथा | आणि |
| परिक्लिष्टम् | Pari-KliShTam | reluctantly | क्लेशपूर्वक | मोठ्या कष्टाने |
| तत् | Tat | that | वह | ते |
| दानम् | Daanam | gift | दान | दान |
| राजसम् | Raajasam | Raajasika | राजस | राजस |
| स्मृतम् | Smrutam | is considered | कहा गया है | असे म्हणतात |

अन्वय :- यत् तु प्रत्युपकारार्थम् , फलम् उद्दिश्य वा , पुनः परिक्लिष्टम् च दीयते , तत् दानम् राजसम् स्मृतम् ॥ १७ - २१ ॥

**English translation:-**

The gift which is given only to receive something in return or expecting a reward, again reluctantly, is considered as "Raajasika Daana".

हिन्दी अनुवाद :-

किन्तु जो दान क्लेशपूर्वक तथा प्रत्युपकार के प्रयोजन से अथवा फल को दृष्टि में रखकर फिर दिया जाता है , वह दान राजस कहा गया है ।

मराठी भाषान्तर :-

परंतु , जे दान परतफेडीच्या अपेक्षेने किंवा फळाची इच्छा ठेवून , मोठ्या कष्टाने दिले जाते ; त्याला राजस दान असे म्हणतात .

विनोबांची गीताई :-

उपकार अपेक्षूनि अथवा फळ वांछुनी
क्लेश - पूर्वक जें देणें ज़ाण तें दान राजस ॥ १७ - २१ ॥

अदेशेकाले यत् दानम् अपात्रेभ्यः च दीयते ।

असत्कृतम् अवज्ञातम् तत् तामसम् उदाहृतम् ॥ १७ - २२॥

| शब्द | शब्द उच्चार | English | हिन्दी | मराठी |
|---|---|---|---|---|
| अदेशेकाले | Adeshekaale | at a wrong place and time | अयोग्य देश – काल में | अयोग्य ठिकाणी, अयोग्य वेळी |
| यत् | Yat | that which | जो | जे |
| दानम् | Daanam | gift | दान | दान |
| अपात्रेभ्यः | ApaatrebhyaH | to unworthy recipients | कुपात्र के प्रति | अयोग्य व्यक्तीला |
| च | Cha | and | और | आणि |
| दीयते | Deeyate | is given | दिया जाता है | दिले जाते |
| असत्कृतम् | Astkrutam | without respect | बिना सत्कार के | सत्कार न करता |
| अवज्ञातम् | Avadnyaatam | with insult | तिरस्कारपूर्वक | अपमानपूर्वक |
| तत् | Tat | that | वह दान | त्याला |
| तामसम् | Taamasam | Taamasika | तामस | तामस |
| उदाहृतम् | Udaahrutam | is declared | कहा गया है | असे म्हणतात |

अन्वय :- यत् दानम् असत्कृतम् अवज्ञातम् , अदेशेकाले अपात्रेभ्यः च दीयते , तत् तामसम् उदाहृतम् ॥ १७ - २२॥

**English translation:-**

The gift that is given at a wrong place and time, to unworthy recipients, without respect or with insult, is declared to be "Taamasika Daana".

हिन्दी अनुवाद :-

जो दान बिना सत्कार के अथवा तिरस्कार पूर्वक अयोग्य देश - काल में और कुपात्र के प्रति दिया जाता है , वह दान तामस कहा गया है ।

मराठी भाषान्तर :-

जे दान , सत्कार न करता आणि अपमानपूर्वक , अयोग्य ठिकाणी , अयोग्य वेळी आणि अयोग्य व्यक्तीला दिले जाते ; त्याला तामस दान असे म्हणतात .

विनोबांची गीताई :-

करूनि भावना तुच्छ देशादिक न पाहतां
अनादरें चि ज़ें देणें ज़ाण तें दान तामस ॥ १७ - २२ ॥

ॐ तत् सत् इति निर्देशः ब्रह्मणः त्रिविधः स्मृतः ।

ब्राह्मणाः तेन वेदाः च यज्ञाः च विहिताः पुरा ॥ १७ - २३॥

| शब्द | शब्द - उच्चार | English | हिन्दी | मराठी |
|---|---|---|---|---|
| ॐ | AUM | Om (The divine monosyllable) | "ॐ" | "ॐ" |
| तत् | Tat | that is | तत् | तत् |
| सत् | Sat | real | सत् | सत् |
| इति | Iti | thus | ऐसे | असे |
| निर्देशः | NirdeshaH | designation | नाम | उल्लेख |
| ब्रह्मणः | BrahmaNaH | of Brahman | सच्चिदानन्दघन ब्रह्म का | सच्चिदानंदघन ब्रह्माचा |
| त्रिविधः | TrividhaH | threefold | तीन प्रकार का | तीन प्रकारचे |
| स्मृतः | SmrutaH | has been considered | कहा है | आहे |
| ब्राह्मणाः | BraahmaNaaH | Brahmanas | ब्राह्मण | ब्राह्मण |
| तेन | Tena | by that | उसी से | त्याच्याकडून |
| वेदाः | VedaaH | Vedas | वेद | वेद इत्यादी |
| च | Cha | and | और | आणि |
| यज्ञाः | YadnyaaH | sacrifices | तथा यज्ञादि | यज्ञ |
| च | Cha | and | और | आणि |
| विहिताः | VihitaaH | created | रचे गये | निर्मिले गेले |
| पुरा | Puraa | ancient | सृष्टि के आदिकाल में | सृष्टीच्या आदिकाळी |

अन्वय :- ॐ तत् सत् इति ब्रह्मणः त्रिविधः निर्देशः स्मृतः तेन ब्राह्मणाः वेदाः च यज्ञाः च पुरा विहिताः ॥ १७ - २३ ॥

**English translation:-**

"Om Tat Sat" has been considered as the threefold designation of that all pervading Brahman, from which arose Brahmanas, Vedas and sacrifices of yore.

हिन्दी अनुवाद :-

ॐ , तत् और सत् ऐसे यह तीन प्रकार का सच्चिदानन्दघन ब्रह्म का नामस्मरण कहा गया है। उसी से सृष्टि के आदिकाल में ब्राह्मण और वेद तथा यज्ञादि रचे गये थे।

मराठी भाषान्तर :-

ॐ , तत् , सत् असा ब्रह्माचा तीन प्रकारे नामोच्चार केला जातो . या ब्रह्मापासून पूर्वकाळी म्हणजेच सृष्टीच्या आरंभी ; ब्राह्मण , वेद आणि यज्ञ निर्माण झाले आहेत .

विनोबांची गीताई :-

ॐ - तत् - सत् ह्यापरी ब्रह्म तिहेरी स्मरलें असे<br>
त्यांतूनि निर्मिले पूर्वी वेद यज्ञ उपासक ॥ १७ - २३ ॥

तस्मात् ॐ इति उदाहृत्य यज्ञ - दान - तपः - क्रियाः ।

प्रवर्तन्ते विधान उक्ताः सततम् ब्रह्मवादिनाम् ॥ १७ - २४ ॥

| शब्द | शब्द उच्चार | English | हिन्दी | मराठी |
|---|---|---|---|---|
| तस्मात् | Tasmaat | therefore | इसलिये | म्हणून |
| ॐ | AUM | Om (The divine monosyllable) | "ॐ" | "ॐ" |
| इति | Iti | thus | इस परमात्मा के नाम को | असे (या परमात्म्याच्या नामाचे ) |
| उदाहृत्य | Udaahrutya | having uttered | उच्चारण कर के ही | उच्चारण करूनच |
| यज्ञ | Yadnya | sacrifice | यज्ञ | यज्ञ |
| दान | Daana | gift | दान | दान |
| तपः | TapaH | austerity | तपस्वरूप | तप |
| क्रियाः | KriyaaH | various acts | क्रियाएँ | क्रिया |
| प्रवर्तन्ते | Pravartante | begun | आरम्भ होती हैं | सुरू होतात |
| विधान - उक्ताः | Vidhaana - UktaaH | as enjoined in the scriptures | शास्त्रविधि से नियत | शास्त्रविधीने नियत |
| सततम् | Satatam | always | सदा | सतत |
| ब्रह्मवादिनाम् | Brahma - Vaadinaam | By the students of Brahman | वेद मन्त्रों का उच्चारण करनेवाले श्रेष्ठ पुरुषों की | वेदमंत्रांचे उच्चारण करणाऱ्या श्रेष्ठ पुरुषांच्या |

अन्वय :- तस्मात् ब्रह्मवादिनाम् विधान - उक्ताः यज्ञ - दान - तपः - क्रियाः ॐ इति उदाहृत्य सततम् प्रवर्तन्ते ॥ १७ - २४ ॥

**English translation:-**

Therefore the acts of sacrifice, gift and austerity, as enjoined in the scriptures, are begun by students of Brahman always uttering Om.

हिन्दी अनुवाद :-

इसलिये वेद मन्त्रों का उच्चारण करनेवाले श्रेष्ठ पुरुषों की , शास्त्रविधि से नियत यज्ञ दान और तपस्वरूप क्रियाएँ , सदा 'ॐ' इस परमात्मा के नाम को उच्चारण कर के ही आरम्भ होती हैं ।

मराठी भाषान्तर :-

म्हणूनच ब्रह्मवादी लोकांची यज्ञ , दान , तपादि कर्मे यथाशास्त्र ॐकाराचा सतत उच्चार करून सुरू होतात .

विनोबांची गीताई :-

म्हणूनी आधीं ॐ - कार उच्चारूनि उपासक<br>
यज्ञ - दान - तपें उक्त निरंतर अनुष्ठिती ॥ १७ - २४ ॥

तत् इति अनभिसंधाय फलम् यज्ञ तपः क्रियाः ।

दानक्रियाः च विविधाः क्रियन्ते मोक्षकाङ्क्षिभिः ॥ १७ - २५॥

| शब्द | शब्द - उच्चार | English | हिन्दी | मराठी |
|---|---|---|---|---|
| तत् | Tat | that | 'तत्' नाम से कहे जानेवाले परमात्मा का | 'तत्' या नावाने ओळखल्या जाणाऱ्या परमात्म्याचे |
| इति | Iti | thus | ही यह सब है इस भाव से | हे (सर्व काही आहे या भावनेने) |
| अनभिसंधाय | Anabhidhaaya | without aiming at | न चाहकर | अपेक्षा न धरता |
| फलम् | Phalam | fruit | फल को | फळाची |
| यज्ञ | Yadnya | sacrifice | यज्ञ | यज्ञ |
| तपः | TapaH | austerity | तपस्वरूप | तप |
| क्रियाः | KriyaaH | various acts of | क्रियाएँ | क्रिया |
| दानक्रियाः | Daana-KriyaaH | acts of gift | दानरूप क्रिया | दानक्रिया |
| च | Cha | and | तथा | तसेच |
| विविधाः | VividhaaH | various | नाना प्रकार की | नाना प्रकारच्या |
| क्रियन्ते | Kriyante | are performed | की जाती हैं | केल्या जातात |
| मोक्षकाङ्क्षिभिः | Moksha-KaankshibhiH | by seekers of liberation | कल्याण की इच्छावाले पुरुषों द्वारा | मोक्ष-कल्याणाची इच्छा करणाऱ्या पुरुषांकडून |

अन्वय :- मोक्षकाङ्क्षिभिः तत् इति ( उदाहृत्य ) फलम् अनभिसंधाय विविधाः यज्ञ - तपः - क्रियाः दानक्रियाः च क्रियन्ते ॥ १७ - २५ ॥

**English translation:-**

By uttering "Tat", without aiming at the rewards, the various acts of sacrifice, austerity and gift are performed by the seekers of Moksha (liberation from the cycle of life and death).

हिन्दी अनुवाद :-

' तत् ' नाम से कहे जानेवाले परमात्मा का ही यह सब है। इस भाव से फल को न चाहकर नाना प्रकार की यज्ञ , तपस्वरूप तथा दानरूप क्रियाएँ कल्याण की इच्छावाले पुरुषों द्वारा की जाती हैं।

मराठी भाषान्तर :-

मोक्षप्राप्तीची इच्छा करणारे लोक ' तत् ' शब्दाचा उच्चार करून , फळाची अपेक्षा न करता ; यज्ञकर्मे , तपश्चर्या आणि दानक्रिया करतात .

विनोबांची गीताई :-

तत् - कार - स्मरणें सर्व तोडूनि फल - वासना
नाना यज्ञ तपें दानें करिती मोक्ष लक्षुनी ॥ १७ - २५ ॥

सद्भावे साधुभावे च सत् इति एतत् प्रयुज्यते ।

प्रशस्ते कर्मणि तथा सत् शब्दः पार्थ युज्यते ॥ १७ - २६॥

| शब्द | शब्द - उच्चार | English | हिन्दी | मराठी |
|---|---|---|---|---|
| सद्भावे | Sad - bhaave | in the sense of reality / existence | सत्यभाव में | सत्यभावात |
| साधुभावे | Saadhu - bhaave | in the sense of goodness | श्रेष्ठभाव में | श्रेष्ठभावात |
| च | Cha | and | और | आणि |
| सत् | Sat | Sat | ' सत् ' | सत् |
| इति | Iti | thus | इस प्रकार | या प्रकारे |
| एतत् | Etat | this | यह परमात्मा का नाम | या (परमात्म्याच्या नामाचा) |
| प्रयुज्यते | Prayujjyate | is used | प्रयोग किया जाता है | प्रयोग केला जातो |
| प्रशस्ते | Prashaste | auspicious | उत्तम | उत्तम |
| कर्मणि | KarmaNi | in act | कर्म में भी | कर्मात |
| तथा | Tathaa | so also | तथा | तसेच |
| सत् | Sat | Sat | ' सत् ' | ' सत् ' |
| शब्दः | ShabdaH | word | शब्द का | शब्द |
| पार्थ | Paartha | O Arjuna! | हे पार्थ ! | हे अर्जुना ! |
| युज्यते | Yujyate | is used | प्रयोग किया जाता है | प्रयोग केला जातो |

अन्वय :- ( ज्ञानिभिः ) सत् इति एतत् सद्भावे च साधुभावे च प्रयुज्यते तथा हे पार्थ ! प्रशस्ते कर्मणि सत् शब्दः युज्यते ॥ १७ - २६ ॥

**English translation:-**

The word "Sat" is used in the sense of reality and of goodness; and so also O Arjuna, the word "Sat" is used in the sense of an auspicious act.

हिन्दी अनुवाद :-

' सत् ' इस प्रकार यह परमात्मा का नाम सत्यभाव में और श्रेष्ठभाव में प्रयोग किया जाता है तथा हे पार्थ ! उत्तम कर्म में भी ' सत् ' शब्दका प्रयोग किया जाता है ।

मराठी भाषान्तर :-

हे अर्जुना ! ज्ञानी लोक ' सत् ' शब्दाचा उपयोग सद्भाव आणि साधुभाव याअर्थी करतात . तसेच उत्तम कार्यासाठीही ' सत् ' शब्द योजला जातो .

विनोबांची गीताई :-

सत् - कार - स्मरणें लाभे सत्यता आणि साधुता
तशी सुंदरता कर्मीं सत् - कारें बोलिली असे ॥ १७ - २६ ॥

यज्ञे तपसि दाने च स्थितिः सत् इति च उच्यते ।

कर्म च एव तद् अर्थीयम् सत् इति एव अभिधीयते ॥ १७ - २७॥

| शब्द | शब्द - उच्चार | English | हिन्दी | मराठी |
|---|---|---|---|---|
| यज्ञे | Yadnye | in sacrifice | यज्ञ में | यज्ञात |
| तपसि | Tapasi | in austerity | तप में | तपात |
| दाने | Daane | in gift | दान में | दानात |
| च | Cha | and | और | तसेच |
| स्थितिः | SthitiH | steadfastness | जो स्थिति है | स्थिती (श्रद्धा व आस्तिकभाव) |
| सत् | Sat | Sat | सत् | सत् |
| इति | Iti | thus | इस प्रकार | याप्रकारे |
| च | Cha | and | और | आणि |
| उच्यते | Uchyate | is called | कही जाती है | सांगितली जाते |
| कर्म | Karma | action | कर्म | कर्म |
| च | Cha | and | और | आणि |
| एव | Eva | also | निश्चयपूर्वक | निश्चितपणे |
| तद् | Tad | Tat / Tad (Brahman) | उस परमात्मा के लिये | त्या ( परमात्म्याच्या साठी ) |
| अर्थीयम् | Artheeyam | for the sake of | किया हुआ | च्यासाठी |
| सत् | Sat | Sat | सत् | सत् |
| इति | Iti | thus | ऐसे | असे |
| एव | Eva | even | वह भी | सुद्धा |
| अभिधीयते | Abhidheeyate | is called | कहा जाता है | म्हटले जाते |

अन्वय :- यज्ञे तपसि दाने च स्थितिः सत् इति च उच्यते। तद् अर्थीयम् कर्म च एव सत् इति एव अभिधीयते ॥ १७ - २७॥

**English translation:-**

Steadfastness in sacrifice, austerity and gift is also called “Sat”, also action for “Tat” (Brahman) is even called “Sat”.

हिन्दी अनुवाद :-

तथा यज्ञ, तप और दान में जो स्थिति है वह भी ‘ सत् ‘ इस प्रकार कही जाती है और उस परमात्मा के लिये किया हुआ कर्म निश्चयपूर्वक ‘ सत् ‘ ऐसे कहा जाता है।

मराठी भाषान्तर :-

यज्ञ, तप आणि दान यांच्यात जी स्थिर भावना ठेवावी लागते, त्या निष्ठेलाही ‘ सत् ‘ असे म्हणतात आणि त्यासाठी केलेले कर्म, त्यालाही ‘ सत् ‘ म्हणजेच सत्कर्म असे म्हणतात .

विनोबांची गीताई :-

यज्ञ - दान - तपें किंवा कर्मे जीं त्यांस साधक
वागणें ह्यापरी त्यांत सत् - कार - फळ बोलिलें ॥ १७ - २७ ॥

अश्रद्धया हुतम् दत्तम् तपः तप्तम् कृतम् च यत् ।

असत् इति उच्यते पार्थ न च तत् प्रेत्य न इह ॥ १७ - २८॥

| शब्द | शब्द उच्चार | English | हिन्दी | मराठी |
|---|---|---|---|---|
| अश्रद्धया | Ashraddhayaa | without faith | बिना श्रद्धा के | श्रद्धेविना |
| हुतम् | Hutam | is sacrificed | किया हुआ हवन | केले जाणारे हवन |
| दत्तम् | Dattam | given | दिया हुआ दान | दिलेले दान |
| तपः | TapaH | austerity | तपा हुआ | तप |
| तप्तम् | Taptam | is practised | तप | आचरलेले |
| कृतम् | Krutam | done | किया हुआ शुभ कर्म है | केलेले (शुभ कार्य) |
| च | Cha | and | और | आणि |
| यत् | Yat | that which | जो कुछ भी | जे काहीही |
| असत् | Asat | Asat | ‘ असत् ‘ | ‘ असत् ‘ |
| इति | Iti | thus | इस प्रकार | असे |
| उच्यते | Uchyate | is called | कहा जाता है | सांगितले जाते |
| पार्थ | Paartha | O Arjuna! | हे अर्जुन ! | हे अर्जुना ! |
| न | Na | not | न तो | (लाभदायक) नाही |
| च | Cha | and | और | आणि |
| तत् | Tat | that | वह | ते |
| प्रेत्य | Pretya | hereafter / after death | मरने के बाद ही | मेल्यावरही |
| न | Na | not | न | नाही |
| इह | Iha | here | तो इस लोक में | या पृथ्वीलोकीही |

अन्वय :- हे पार्थ ! अश्रद्धया हुतम् दत्तम्, तपः तप्तम्, यत् च कृतम् ; तत् असत् इति उच्यते ; (तत्) न प्रेत्य , इह (अपि) च (फलप्रदम्) न (भवति) ॥ १७ - २८ ॥

**English translation:-**

Whatever is sacrificed, given or performed and whatever austerity is practised without faith, it is called "Asat", O Arjuna. Such action is meaningless and purposeless here (in present life) or hereafter (after death).

हिन्दी अनुवाद :-

हे अर्जुन ! बिना श्रद्धा के किया हुआ हवन, दिया हुआ दान एवं तपा हुआ तप और जो कुछ भी किया हुआ अशुभ कर्म है वह समस्त 'असत्' इस प्रकार कहा जाता है ; इसलिये वह न तो इस लोक में लाभदायक है और न मरने के बाद ही ।

मराठी भाषान्तर :-

हे अर्जुना ! श्रद्धेशिवाय केलेले हवन, दिलेले दान, केलेले तप आणि जे काही केलेले कार्य असेल, ते सर्व 'असत्' म्हटले जाते . त्यामुळे ते न इहलोकात, न परलोकात फळदायी ठरते .

विनोबांची गीताई :-

यज्ञ दानें तपें कर्में अश्रद्धेनें अनुष्ठिलीं
बोलिलीं सर्व तीं मिथ्या दोन्ही लोकांत निष्फळ ॥ १७ - २८ ॥

ॐ तत् सत् इति श्रीमद् भगवद् गीतासु उपनिषत्सु ब्रह्मविद्यायाम् योगशास्त्रे श्रीकृष्णार्जुन संवादे श्रद्धात्रयविभागयोगो नाम सप्तदशोऽध्यायः ॥

हरिः ॐ तत् सत् । हरिः ॐ तत् सत् । हरिः ॐ तत् सत् ।

**Om that is real. Thus, in the Upanishad of the glorious Bhagwad Geeta, the knowledge of Brahman, the Supreme, the science of Yoga and the dialogue between Shri Krishna and Arjuna this is the seventeenth discourse designated as "The Yoga of Threefold Division of Faith".**

## सतराव्या अध्यायाचा एका श्लोकात मथितार्थ

सत्त्व रजस्तम तीन गुणांसह श्रद्धा तप मख दान असे ।
अशनहि तैसें निजबीजापरि आवडि त्यावरि दृढ बैसे ॥
उत्तम मध्यम अधम जाण ही कर्मे त्यांतुनि सत्त्व धरी ।
मग ॐ तत् सत् म्हणुनि धनंजय ब्रह्मसमर्पण कर्म करी ॥ १७॥

गीता सुगीता कर्तव्या किम् अन्यैः शास्त्रविस्तरैः ।
या स्वयम् पद्मनाभस्य मुखपद्माद् विनिःसृता ॥

गीता सुगीता करण्याजोगी आहे म्हणजेच गीता उत्तम प्रकारे वाचून तिचा अर्थ आणि भाव अन्तःकरणात साठवणे हे कर्तव्य आहे. स्वतः पद्मनाभ भगवान् श्रीविष्णूंच्या मुखकमलातून गीता प्रगट झाली आहे. मग इतर शास्त्रांच्या फाफटपसाऱ्याची जरूरच काय ?

- श्री महर्षी व्यास

### विनोबांची गीताई :-

गीताई माउली माझी तिचा मी बाळ नेणता ।
पडतां रडतां घेई उचलूनि कडेवरी ॥